शास्त्री द्वितीय खण्डस्य कृते साहित्यम्

## साहित्यदर्पणः षष्ठः परिच्छेदः

को नाम अर्थोपक्षेपकः, कति विधश्च सः ? इति सोदाहरणं प्रतिपादयत।

अर्थान् = कथावस्तूनि, उपक्षिपन्ति = उपस्थापयन्ति, यः सोऽर्थोपक्षेपकः। स च पञ्चविधो भवति - विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः, अङ्कमुखं चेति। तेषां क्रमेण स्वरूपमुच्यते —

विष्कम्भकः - अतीतानाम् आगामिनां च वृत्तान्तभागानां कथावयवानां कथांशविशेषः, संक्षिप्तार्थः (स्वल्पं कथावस्तु) अङ्कस्य पूर्वभागे प्रयोजितो विष्कम्भकः स्यात्। स चैकेन मध्यमपात्रेण द्वाभ्यां वा मध्यमपात्राभ्यां बहुभिर्वा मध्यमपात्रैः संचालितः संस्कृतात्मकः शुद्धः स्यात्। अधममध्यमपात्राभ्यां प्रयोजितस्तु संस्कृतप्राकृतात्मकः मिश्रः स्यात्। तथा चैकजातीयपात्रप्रयुक्तत्वेन शुद्धत्वम्; विभिन्नजातीयपात्रप्रयुक्तत्वेन मिश्रत्वम् इति उक्तञ्च —

'वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः।
शुद्धः स्यात् स तु संकीर्णो नीचमध्यमकल्पितः॥' इति

तत्र शुद्धो यथा:- मालतीमाधवे अघोरघण्टस्य शिष्यया कपालकुण्डलया प्रयोजितः। मिश्रविष्कम्भको यथा - रामाभिनन्दे क्षपणककापालिकाभ्यां प्रयोजितः।

प्रवेशकः — अङ्कद्वयस्य मध्ये अनुदात्तोक्त्या संस्कृतेतरभाषया, एकेन नीचपात्रेण नीचाभ्यां वा पात्राभ्यां नीचैर्वा पात्रैः प्रयोजितः कथांशविशेषः अर्थ्यस्मात् अर्थान् सामाजिकहृदये प्रवेशयति = सूचयतीति प्रवेशको विज्ञेयः, अत्र नीचत्वं संस्कृतेतरभाषित्वादेव। तेन संस्कारादिमिश्रस्य प्रवेशकस्य प्रयोजितत्वम्। शेषं तु विष्कम्भवद् विज्ञेयम्। उक्तञ्च —

'प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा॥'

अङ्कद्वयस्यान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः। यथा वेणीसंहारनाटके तृतीयाङ्के - राक्षसस्य राक्षस्याश्च नीचोक्त्या सिन्धुराजवधः। भीमदुःशासनवधश्च सूचित इति भावः। अत्र पात्रवैलक्षण्यप्रतिपादनेन विष्कम्भप्रवेशकयोर्वैलक्षण्यं प्रतिपादितम्।

चूलिका — यवनिकान्तर्देशस्थितैः पात्रैः वस्तुविशेषस्य सूचना चूलिका कथ्यते। यथा - वीरचरिते चतुर्थाङ्कस्यादौ - (नेपथ्ये) भो भो वैमानिकाः प्रवर्तन्तां रङ्गमङ्गलानि' इत्यादि। 'रामेण परशुरामो जितः' इति नेपथ्ये पात्रैः सूचितम्।

शेषांशोऽग्रिमपृष्ठे द्रष्टव्यः

Sep 12, 2020

अङ्कावतारः — यत्र पूर्वाङ्कस्य अन्ते पात्रैः
तदङ्कस्याविभागेन कथ्यते। यथा — अभिज्ञानशाकुन्तल
नाटके पञ्चमाङ्के पात्रैः सूचितः षष्ठोऽङ्कः तदङ्कस्याङ्ग
विशेषं प्रकाशयति।

अङ्कमुखम् — यत्रैकस्मिन्नेवाङ्के समस्तानाम् अङ्का-
नाम् अविकला सूचना। मालतीमाधवे प्रथ-
माङ्कादौ कामन्दक्यवलोकिते भूरिवसुप्रभृतीनां
भाविभूमिकानां परिक्षिप्त कथा प्रबन्धस्य च
प्रसङ्गात् सन्निवेशं सूचितवत्यौ।
धनिकानुसारेण अङ्कमुखस्य लक्षणं भिन्नम् —
अङ्कान्ते प्रविष्टैः पात्रैः अग्रिमाङ्कस्य प्रकाशं
सूचनाद् अङ्कमुखं भवेत्। अस्य तु अङ्क
अवतारेण इदं गतार्थमित्याहुः इति।

उपेन्द्र झा
12/9/20
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
पुरवैला, पूर्णियाँ

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
<u>अलङ्कार विवेचनम्</u>

श्लेषालङ्कारस्य लक्षणोदाहरणं विवेचनम् ।

अनेकार्थैन सम्मिलितैः एकोच्चारणेनैव युगपदेनेका-र्थबोधकैः पदैः अभिधया अनेकार्थं बोध्यते सति श्लेषोऽलङ्कारः। स च (शब्दश्लेषः) वर्ण-प्रत्यय-लिङ्ग-प्रकृति-पद-विभक्ति-वचन-भाषाणां श्लेषाद् अष्टधा भवति। यथा चोक्तं साहित्यदर्पणे —

'श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।
वर्णप्रत्ययलिङ्गानां ~~प्रकृत्यो~~ प्रकृत्योः पदयोरपि।
श्लेषाद् विभक्ति-वचनभाषाणामष्टधा च सः॥' इति

तत्र वर्णश्लेषो यथा —

'प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि॥'

अत्र 'विधौ' इति विधु-विधि-शब्दयोः उकारेकारयोः औकाररूपत्वात् श्लेषः। प्रत्ययोः वचनयोश्च श्लेषो यथा —

'किरणा हरिणाङ्कस्य दक्षिणश्च समीरणः।
कान्तोत्सङ्गजुषां नूनं सर्व एव सुधाकिरः॥'

अत्र 'सुधाकिरः' इति क्विप्-क-प्रत्ययोः श्लेषः। किञ्चात्र बहुवचनैकवचनयोः एकरूपत्वाद् वचनश्लेषोऽपि विद्यते।

लिङ्गश्लेषो यथा —

'विकसन्नेत्रनीलाब्जे तथा तन्वी स्तनद्वयी।
तव दत्तां सदामोदं लसत्तरलहारिणी॥'

अत्र नपुंसकलिङ्ग-स्त्रीलिङ्गयोः श्लेषो वचनश्लेषोऽपि वर्तते।

प्रकृतिश्लेषो यथा —

'अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः॥'

अत्र 'वक्ष्यति' इति वहि-वच्योः, सामर्थ्यकृत् इति कृन्तति-करोत्योः प्रकृत्योः श्लेषः।

पदश्लेषो यथा —

'पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्॥'

अत्र पदं भङ्गे विभक्ति-समासयोरपि वैलक्षण्यात् पदश्लेषः नतु प्रकृति-श्लेषः। विभक्ति श्लेषो यथा —

'सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः।
नयोपकारसाम्मुख्यमायासि तनुवर्तनम्॥'

अत्र हर इत्येकस्मिन् पक्षे शिव सम्बोधनमितिसुप् परस्मिन् पक्षे तु धात्वोरसि लोटि विभक्तिः। एवं यथाऽत्र सुप्तिङो श्लेषस्तथा 'भव-नय-आयासि-तनु' इत्येषु ज्ञेयम्।

भाषा श्लेषो यथा —

'महदे सुरसंधं मे तमव समासङ्गमागमाहरणे।
हर बहुसरणं तं चित्तमोहमवसर उमे सहसा॥'

अत्र संस्कृत महाराष्ट्र्योः भाषयोः श्लेषः।
अयं किञ्च विधोऽयं श्लेषः सभङ्ग-अभङ्गभेदात् पुनर्द्विविधः इति

उपेन्द्र झा
12/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
कुलसेरा, बहेड़ी

Sep 12, 2020

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञान शाकुन्तलम् नाम नाटकस्य
चतुर्थाङ्कस्य श्लोक व्याख्या ।

'क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतम्
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि नः किसलयच्छायापरिस्पर्धिभिः ॥'

श्लोकोऽयं 'पुरा कवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः' इत्युक्ति दिशा कविमण्डलमण्डनायमानेन अप्रतिमप्रातिभसम्पत्ति भास्वमानेन कविता वनिता विलासेन महाकविना कालिदासेन विरचितस्य निखिलनाट्यतत्त्वयुक्तस्य, काव्यकलासमन्वितस्य, सर्वदा नव नवायमान नाट्यसाहित्य शिरोरत्नभूतस्य संस्कृतसाहित्य नवनीत स्वरूपात् अभिज्ञान शाकुन्तलम् नाम नाटकस्य चतुर्थाङ्कात् गृहीतोऽस्ति ।

अत्र शकुन्तलायाः पतिगृहगमनवेलायां वनस्पतिभिः शकुन्तलायै नानाप्रकारकमाभरणादिकं प्रदत्तम् । यदा काश्यपशिष्याः पुष्पचयनार्थं गतास्तदा तेषां हस्ते वनस्पतिभ्यः क्षौमादिकं दत्तमिति हारीतनामकः शिष्यः गौतमीं ज्ञापयति —

केनचित् तरुणा इन्दुपाण्डु माङ्गल्यं क्षौमम् आविष्कृतम्, केनचित् चरणोपरागसुभगः लाक्षारसः निष्ठ्यूतः, अन्येभ्यः आपर्वभागोत्थितैः किसलयच्छायापरिस्पर्धिभिः वनदेवताकरतलैः न आभरणानि दत्तानि

केनचित् = एकेन तरुणा = वृक्षेण इन्दुः = चन्द्रः तद्वत् पाण्डु = पीतवर्णी माङ्गल्यं = माङ्गलिकं क्षौमं = क्षौमवस्त्रं आविष्कृतं = प्रकटितम्, केनचित् = अन्येन वृक्षेण चरणयोः = पादयोः उपरागाय = रञ्जनाय सुभगः = सुन्दरः लाक्षारसः = चरण रञ्जन द्रव्यं निष्ठ्यूतः = ~~एक~~ प्रकटितः अन्येभ्यः = इतरेभ्यः वृक्षेभ्यः आपर्वभागोत्थितैः = करतलभाग मात्र बहिरागतैः किसलयानां = करपल्लवानां छाया = कान्तिः तां परिस्पर्धन्ते = तुलयन्ति तच्छीलानि तैः वनदेवतानां छाया = कान्तिः तां परिस्पर्धन्ते = तुलयन्ति तच्छीलानि तैः वनदेवतानां करतलैः = हस्ताग्रभागैः नः = अस्माकं आभरणानि = आभूषणानि दत्तानि = समर्पितानि ।

अत्र 'इन्दुपाण्डु' 'किसलयच्छायापरिस्पर्धिभिः' इत्यादौ लुप्तोपमालङ्कारः । शार्दूलविक्रीडितं वृत्तम् — 'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ।

उपेन्द्र झा
12/9/20
असि॰ प्रो॰ साहित्य
रा॰ आ॰ सं॰ महाविद्या॰
दुरखेला, हटिया